## || શ્રી નૃસિંહ મંત્રરાજપદ સ્તોત્રં ||

પાર્વત્યુવાચ –
મન્ત્રાણાં પરમં મન્ત્રં ગુહ્યાનાં ગુહ્યમેવ ચ |
બ્રૂહિ મે નારસિંહસ્ય તત્ત્વં મન્ત્રસ્ય દુર્લભમ્ ||
શંકર ઉવાચ –
વૃત્તોત્ફુલ્લવિશાલાક્ષં વિપક્ષક્ષયદીક્ષિતં |
નિનાદત્રસ્તવિશ્વાણ્ડં વિષ્ણુમુગ્રં નમામ્યહમ્ || ૧ ||
સર્વૈરવધ્યતાં પ્રાપ્તં સબલૌઘં દિતેસ્સુતં |
નખાગ્રૈશ્શકલીચક્રેયસ્તં વીરં નમામ્યહમ્ || ૨ ||
પાદાવષ્ટબ્ધપાતાળં મૂર્ધાઽઽવિષ્ટત્રિવિષ્ટપં |
ભુજપ્રવિષ્ટાષ્ટદિશં મહાવિષ્ણું નમામ્યહમ્ || ૩ ||
જ્યોતીંષ્યર્કેન્દુનક્ષત્રજ્વલનાદીન્યનુક્રમાત્ |
જ્વલન્તિ તેજસા યસ્ય તં જ્વલન્તં નમામ્યહમ્ || ૪ ||
સર્વેન્દ્રિયૈરપિ વિના સર્વં સર્વત્ર સર્વદા |
જાનાતિ યો નમામ્યાદ્યં તમહં સર્વતોમુખમ્ || ૫ ||
નરવત્સિંહવચ્ચૈવ રૂપં યસ્ય મહાત્મનઃ |
મહાસટં મહાદંષ્ટ્રં તં નૃસિંહં નમામ્યહમ્ || ૬ ||
યન્નામસ્મરણાદ્ભીતા ભૂતવેતાળરાક્ષસાઃ |
રોગાદ્યાશ્ચ પ્રણશ્યન્તિ ભીષણં તં નમામ્યહમ્ || ૭ ||
સર્વેઽપિ યં સમાશ્રિત્ય સકલં ભદ્રમશ્નુતે |
શ્રિયા ચ ભદ્રયા જુષ્ટો યસ્તં ભદ્રં નમામ્યહમ્ || ૮ ||
સાક્ષાત્સ્વકાલે સમ્પ્રાપ્તં મૃત્યું શત્રુગણાનપિ |
ભક્તાનાં નાશયેદ્યસ્તુ મૃત્યુમૃત્યું નમામ્યહમ્ || ૯ ||
નમસ્કારાત્મકં યસ્મૈ વિધાયાત્મનિવેદનં |
ત્યક્તદુઃખોઽખિલાન્કામાનશ્નુતે તં નમામ્યહમ્ || ૧૦ ||
દાસભૂતાસ્સ્વતસ્સર્વે હ્યાત્માનઃ પરમાત્મનઃ |
અતોઽહમપિ તે દાસ ઇતિ મત્વા નમામ્યહમ્ || ૧૧ ||
શંકરેણાદરાત્પ્રોક્તં પદાનાં તત્ત્વમુત્તમં |
ત્રિસન્ધ્યં યો જપેત્તસ્ય વિદ્યાઽઽયુશ્શ્રીશ્ચ વર્ધતે || ૧૨ ||
ઇતિ શ્રી શંકરકૃત શ્રીનૃસિંહમંત્રરાજપદસ્તોત્રમ્